वटः, पुं, (वटति वेष्टयति मूलेन वृक्षान्तरमिति । वट् + पचाद्यच् ।) वृक्षविशेषः । वड्गाछ इति भाषा । तत्पर्य्यायः । न्यग्रोधः २ बहुपात् ३ । इत्यमरः । २ । ४ । ३२ ॥ वृक्षनाथः ४ यमप्रियः ५ । इति शब्दरत्नावली ॥ रक्तफलः ६ शृङ्गी ७ कर्म्मजः ८ ध्रुवः ९ क्षीरी १० वैश्रवणावासः ११ भाण्डीरः १२ । इति जटाधरः ॥ जटालः १३ रोहिणः १४ अवरोही १५ विटपी १६ स्कन्धरुहः १७ मण्डली १८ महाच्छायः १९ भृङ्गी २० यक्षावासः २१ यक्षतरुः २२ पादरोहणः २३ नीलः २४ शिफारुहः २५ बहुपादः २६ वनस्पतिः २७ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । शिशिरत्वम् । कफपित्तज्वरदाहतृष्णामोहव्रणशोफनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः ।
वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत् ॥"

इति भावप्रकाशः ॥ * ॥

स च रुद्रस्वरूपः । यथा,—

ऋषय ऊचुः ।

"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ ॥

सूत उवाच ।

अश्वत्थरूपी भगवान् विष्णुरेव न संशयः ।
रुद्ररूपी वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः ।
दुःखापद्व्याधिदुष्टानां विनाशकारिणौ ध्रुवम् ॥"

इति पाद्मोत्तरखण्डे १६० अध्यायः ॥

अन्यत् पलाशशब्दे द्रष्टव्यम् ॥ * ॥ कपर्द्दः । इति मेदिनी । टे, २४ ॥ कड़ि इति भाषा ॥ गोलः । भक्ष्यम् । वड़ा इति भाषा । साम्यम् । इति हेमचन्द्रः ॥ * ॥ क्ली, व्रजमण्डलाभ्यन्तरीणवटसंज्ञकषोड़शवनानि यथा । अथैषां षट्साङ्गवनानामभ्यन्तरे सङ्केतवटाद्या यमुनायाश्चतुरशीतिक्रोशमर्य्यादान्तरे दक्षिणोत्तरतटयोः षोड़शवनानि । पाद्मे ।

"सङ्केतवटमादौ तु भाण्डीराख्यं वटं द्वयम् ।
यावकाख्यं तृतीयञ्च वटं शृङ्गारसंज्ञकम् ॥
तूर्य्यं वंशिवटं श्रेष्ठं पञ्चमं श्रीवटञ्च षट् ।
सप्तमञ्च जटाजूटं कामाख्यवटमष्टकम् ॥
मनोऽर्थवटकं नाम नवमं परिकीर्त्तितम् ।
आशावटं महाश्रेष्ठं दशमं शुभदायकम् ॥
अशोकाख्यं वटं श्रेष्ठमेकादशमुदाहृतम् ।
नाम केलिवटं श्रेष्ठं द्वादशं परिकीर्त्तितम् ॥
नाम ब्रह्मवटञ्चैव त्रयोदशमसंज्ञकम् ।
नाम रुद्रवटं श्रेष्ठं चतुर्द्दशमुदाहृतम् ॥
श्रीधराख्यं वटं ख्यातं पञ्चदशसमीरितम् ।
सावित्राख्यं वटं श्रेष्ठं संख्याषोड़शनिर्म्मितम् ॥"

इति व्रजमण्डलान्तरे षोड़शवटानि । इति नारायणभट्टकृतव्रजभक्तिविलासः ॥ * ॥

वटः, त्रि, (वटतीति । वट् + अच् ।) गुणः । इति मेदिनी । टे, २४ ॥ वेटे इति भाषा ॥

वटकः, पुं, (वट एव । स्वार्थे कन् ।) पिष्टकविशेषः । इत्यमरभरतौ ॥ बड़ा इति भाषा । अस्य गुणौ । विदाहित्वम् । तृष्णाकारित्वञ्च । इति राजवल्लभः ॥ अपि च ।

"माषाणां पिष्टिकां युक्तां लवणार्द्रकहिङ्गुभिः ।
कृत्वा विदध्याद्वटकांस्तांस्तैलेषु पचेच्छनैः ॥
विशुष्का वटका बल्या बृंहणा वीर्य्यवर्द्धनाः ।
वातामयहरा रुच्या विशेषाद्दर्दितापहाः ॥
विबन्धभेदिनः श्लेष्मकारिणोऽत्यग्निपूजिताः ।
संचूर्ण्य निक्षिपेत्तक्रे भृष्टं जीरकहिङ्गु च ॥
लवणं तत्र वटकान् सकलानपि मज्जयेत् ।
शुक्लस्तत्र वटको बलकृद्रोचनो गुरुः ॥
विबन्धकृद्विदाही च श्लेष्मलः पवनापहः ।
राज्यक्ष्मातिरोचिन्या पाचन्या तांस्तु भक्षयेत् ॥"

तत्प्रकारा यथा ।

कदलसुमनमाषक्षोदसत्क्षीरिशस्यै-
र्म्मरिचसुघनदुग्धैः सच्चतुर्ज्जातचन्द्रैः ।
कृत इह घृतपक्वो यः पतेत् खण्डपाके
वटकमन्दतकेलिं सा व्यधात्तं प्रियेष्टम् ॥ १ ॥
सामिचैः शालिचूर्णैर्दधिमरिचसितानारिकेलार्द्रशस्यै-
र्जातीलासल्लवङ्गाम्लतकदलफलैः फेणितैः पिष्टसुद्गैः ।
सृष्टः पक्वो घृते यः प्रपतति समधौ दुग्धपूरे प्रगाढ़े
सेन्दौ कर्पूरकेलिं तमिह सुवटकं सा व्यधात् स्वप्रियेष्टम् ॥ २ ॥
ग्रन्थिवद्वटिकालिस्तैर्द्दध्नः सृष्टा तु या पतेत् ।
पचाम्लते व्यधात्तां सा पीयूषग्रन्थिपालिकाम् ॥ ३ ॥
सक्षीरसारशशितण्डुलनारिकेल-
जातीलवङ्गमरिचैः ससितैः सुपिष्टैः ।
रम्भैलया च घृतभावनया भवेद्या
सा तामनङ्गगुटिकां विदधे प्रियेष्टाम् ॥ ४ ॥
कदलमरिचदुग्धैः खण्डगोधूमपक्व-
प्रकटितवटकोऽयं भूरिजातीफलाढ्यः ।
नवविधुमधुमध्ये यो विलासं विधत्ते
रचित इह तयासौ सीधुपूर्व्वो विलासः ॥ ५ ॥
लवङ्गैरिन्दुमरिचैः संयुतैः शर्करान्वयैः ।
चक्रे गङ्गाजलाख्यानि लड्डुकान्यपराणि च ॥ ६ ॥
तैस्तैर्युतैः क्षीरसारैस्तथा लाङ्गलिशस्यकैः ।
अन्यान्यप्यान्यसंभृष्टैः सा रसैः सरपूपिका ॥" ७

इति रघुनाथभट्टकृते गोविन्दलीलामृते १६ सर्गः ॥ * ॥ अथाम्लिकावटकः ।

"अम्लिकां स्वेदयित्वा तु जलेन सह मर्द्दयेत् ।
तन्नीरे कृतसंस्कारे वटकान् मज्जयेन्नरः ॥
अम्लिकावटकास्ते तु रुच्या वह्निप्रदीपनाः ।
वटकस्य गुणैः पूर्व्वैरेतैऽपि च समन्विताः ॥ * ॥

अथ तक्रवटकः ।

मुद्गानां वटकास्तक्रे मज्जिता लघवो हिमाः ।
संस्कारजप्रभावेण त्रिदोषशमना हिताः ॥ * ॥

अथ माषवटकः ।

माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंस्कृताः ।
तया विरचिता वस्त्रे वटिकाः साधु शोषिताः ॥
तालितास्तप्ततैले ता अथवा सुप्रलेहिताः ।
वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम् ॥ *

अथ कुष्माण्डवटिः ।

कुष्माण्डकवटी ज्ञेया पूर्व्वोक्तवटिकागुणा ।
विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ॥

अथ मुद्गवटिका ।

मुद्गानां वटिका तद्वद्द्रविता साधिता तथा ।
पथ्या रुच्या तती लघ्वी मुद्गसूपगुणा स्मृता ॥"

इति भावप्रकाशः ॥ * ॥

(वटी । बड़ि इति भाषा ॥ यथा,—

"वटका अथ कथ्यन्ते तन्नाम गुटिका वटी ।
मोदको वटिका पिण्डी गुड़ोवर्त्तिस्तथोच्यते ॥
लेहवत् साध्यते वह्नौ गुड़ो वा शर्करायथवा ।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्म्मिता वटी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

यथा च ।

"मण्डूरं चूर्णयेच्छुद्धं गोमूत्रेऽष्टगुणे क्षिपेत् ।
पक्वा च वटकं कृत्वा दद्यात्तक्रानुपानतः ॥"

इति शार्ङ्गधरे मध्यखण्डे सप्तमेऽध्याये मण्डूरवटके ॥ * ॥) अष्टमाषकपरिमाणम् । यथा,—

"दशगुञ्जास्तु माषः स्यात् शाणो माषचतुष्टयम् ।
द्वौ शाणौ वटकः कोलस्तोलको द्रङ्क्षणश्च सः ॥"

इति शब्दमाला ॥

(तथा च ।

"माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते ।
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥"

इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥)

वटपत्रः, पुं, (वटस्येव पत्रं यस्य ।) सितार्जकः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।

"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका ।
पर्णासस्तत्र कृष्णे तु कठिल्लककुठेरकौ ॥
तत्र शुक्लेऽर्ज्जकः प्रोक्तो वटपत्रस्ततोऽपरः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वटपत्रा, स्त्री, (वटस्येव पत्रमस्याः ।) त्रिपुरमालीपुष्पवृक्षः । इति रत्नमाला ॥

वटपत्री, स्त्री, (वटस्येव पत्रं यस्याः । गौरादित्वात् ङीष् ।) पाषाणभेदीविशेषः । तत्पर्य्यायः । इरावती २ ऐरावती ३ गोधावती ४ इरावती ५ श्यामा ६ खड्गाङ्गनामिका ७ । अस्याः गुणाः । हिमत्वम् । गौल्यत्वम् । मेहकृच्छ्रविनाशित्वम् । बलदाहत्वम् । व्रणहन्तृत्वम् । किञ्चिद्दीपनकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"वटपत्री तु कथिता मोहिन्यैरावती बुधैः ।
वटपत्री कषायोष्णा योनिमूत्रगदापहा ॥"

इति भावप्रकाशः ॥

वटरः, पुं, कुक्कुटः । वेष्टः । शठः । चौरः । चञ्चलः । इति शब्दरत्नावली ॥

वटवासी [न्] पुं, स्त्री, (वटे वटवृक्षे वसतीति । वस् + णिनिः ।) यक्षः । इति हेमचन्द्रः । २ । १०८ ॥ वटवृक्षवासकर्त्तरि, त्रि ॥